दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठशुक्लत्रयोदशी-चतुर्दशी
ज्येष्ठ 15 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-216 | 1 | मई 29, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 हिमाचल-पञ्चायत-निर्वाचनम्- प्रदेशस्य वयोवृद्धः ११६ वर्षीयः खड़कू रामः मतदानकेन्द्रं गत्वा मतदानं कृतवान्, तस्य उत्साहं प्रति सादरं नमनम्

3 अंतरराष्ट्रीय-व्यापार-नवोद्यम-उद्यमी-संघस्य तत्वावधानतः भारतीय-प्रौद्योगिकी-संस्थाने, दिल्ली-नगरे "निर्देशक-मार्गदर्शक-सम्मेलन-द्वितीयम्" इति महत्-समारोहः सफलतया सम्पन्नः

5 विश्वे बुभुक्षायाः स्थितिः(दिवसविशेषः) लेखकः- डॉ विमलेश झा,

## कर्नाटकराज्ये डी. के. शिवकुमारः नूतन-मुख्यमन्त्रित्वेन पदभारं ग्रहीष्यति मुख्यमन्त्री सिद्धरमय्या स्वपदात् औपचारिकरूपेण त्यागपत्रं प्रदत्तवान्



**हिमसंस्कृतवार्ता,नरेन्द्रराणा।** कर्नाटकस्य मुख्यमन्त्री सिद्धरमय्या इत्यसौ गतदिवसे लोकभवने राज्यपालस्य सचिवाय औपचारिकरूपेण स्वकीयं त्यागपत्रं समर्पितवान्। वार्ताहरान् सम्बोधयन् सः स्वयं प्रमाणितवान् यत् त्यागपत्रं सचिवाय औपचारिकरुपेण प्रदत्तमिति। अत्रावसरे सः राज्यपालं नूतन-मुख्यमन्त्रिणः पदभार ग्रहणाय आमन्त्रयितुं साग्रहं निवेदितवान्, यतो हि विधानसभायां षट्त्रिंशदधिक-एकशतात् अधिक-विधायकानां समर्थनसहचारेण काङ्ग्रेस-दलस्य पूर्ण-बहुमतं वर्तते। तेन सूचितं यत् काङ्ग्रेस-उच्चाधिकारिभिः तस्मै राज्यसभायाः सदस्यता प्रस्ताविता आसीत्, परञ्च सः राष्ट्रिय राजनीत्यां स्वकीयां अरुचिं प्रकटयन् प्रोक्तवान् यत् सः राज्यस्य जनानां कृते एव निरन्तरं कार्यं करिष्यति। सिद्धरमय्या इत्येषः त्रयोविंशत्यधिक-द्विसहस्रतमे वर्षे द्वितीयवारं कर्नाटकस्य मुख्यमन्त्री सञ्जातः । इतः पूर्वं सः त्रयोदशात् अष्टादशं यावत् मुख्यमन्त्रित्वेन कार्यं अकरोत्। सः राज्ये अष्टवर्षाणां कार्यकालद्वयं पूरयित्वा सर्वाधिक-समयमुपविशता मुख्यमन्त्रित्वेन गौरवम् अर्जितवान्। मुख्यमन्त्रित्वेन वित्तमन्त्रित्वेन च तेन राज्यस्य सप्तदश-आयव्ययकानि उपस्थापितानि। तस्य त्यागपत्रेण राज्ये सुदीर्घकालतः जायमानः सत्ता-सङ्घर्षः समाप्तः। अत्रान्तरे राज्यस्य उपमुख्यमन्त्री डी. के. शिवकुमारः कर्नाटक-काङ्ग्रेस-दलस्य वरिष्ठतमेषु नेतृषु कश्चन प्रमुखः अस्ति। त्रयोविंशत्यधिक-द्विसहस्रतमस्य विधानसभा निर्वाचने काङ्ग्रेस-दलस्य महत्-विजये तेन प्रमुखा भूमिका निर्व्यूढा आसीत्।

## राष्ट्रपतिपदासीना द्रौपदी-मुर्मुः सिक्किम-आरक्षकदलाय राष्ट्रपति-ध्वज-सम्मानं प्रदत्तवती, अत्रान्तरे सिक्किम राज्यम् पूर्ण-साक्षर-राज्यत्वेन घोषितम्



राष्ट्रपतिपदासीना द्रौपदी मुर्मुः गतदिवसे आरक्षक-बलाय बोधितवती यत्, आरक्षकाः अधिकं नागरिकाभिमुखाः भवेयुः, सहैव समाजस्य दुर्बल-वर्गाणां विशेषतः महिलानां, निर्धनानां, बालकानां च विषये संवेदनशीलतां धारयेयुः। राष्ट्रपतिः गतदिवसे प्रातः गङ्गटोक-नगरे आयोजिते अलङ्करण-संचलने सिक्किम-आरक्षक दलाय 'प्रतिष्ठितं राष्ट्रपति-ध्वज-सम्मानं' प्रदाय सम्बोधितवती । तया राज्ये विधि-व्यवस्थायाः पालने सहैव आपद्-प्रबन्धने सिक्किम-आरक्षक-दलस्य भूमिकायाः भूरिशः प्रशंसा कृता। अत्रान्तरे उल्लास-योजनायाः अन्तर्गतं सिक्किम-राज्यं आधिकारिकरूपेण पूर्ण-साक्षर-राज्यत्वेन घोषितं । घोषणेयं तावत् गतदिवसे गङ्गटोक नगरे राष्ट्रपति-मुर्मुः इत्यस्याः गरिमामय उपस्थितौ सिक्किम विश्वविद्यालयस्य दीक्षान्त समारोहे विहिता।

## केन्द्रीय-शिक्षामन्त्री धर्मेन्द्र प्रधानः 'सी.बी.एस.ई. इति द्वादश-कक्षायाः मूल्याङ्कन-प्राविधित्रुटीनां च संज्ञानं गृहीतवान्

केन्द्रीय-शिक्षामन्त्री धर्मेन्द्र प्रधानः गतदिवसे 'सी.बी.एस.ई. इति द्वादश-कक्षायाः मूल्याङ्कन-प्रक्रियायां सहैव एतस्य नूतन-पटलाधारित-अङ्कन प्रणाल्यां' च जातानां प्राविधिक त्रुटीनां च संज्ञानं गृहीतवान्। मन्त्रिणा एतासां विसङ्गतीनां विषये छात्राणां शङ्का-समाधानार्थं दृढं आश्वासनं प्रदत्तम्। शिक्षामन्त्रिणा प्रोक्तं यत्, इयं पटलाधारित-अङ्कन-प्रणाली पारदर्शितां सुनिश्चेतुं कश्चन प्रगतिशील-उपायात्मक-मञ्चः वर्तते। तेन स्पष्टीकृतं यत् सर्वे अधिकारिणः इदं सुनिश्चेष्यन्ति यत् कस्यापि छात्रस्य जिज्ञासा यथावत् न तिष्ठेत्, तथा च सर्वेषु स्तरेषु उत्तरदायित्वं सुदृढं स्यात्।

## होर्मुज-जलडमरूमध्यस्य समीपे आक्रमणानन्तरं अमेरिका-ईरान-देशयोः मध्ये अवसादः वर्धितः



अमेरिका-ईरान-देशयोः मध्ये जायमाना शिथिल-युद्ध-विरामावस्था इदानीं गम्भीर-सङ्कटे समापतिता, यतः हि द्वाभ्याम् अपि पक्षाभ्यां होर्मुज इत्यस्य समीपे परस्परं सैन्य-आक्रमणानि कृतानि। अमरीकी सेनायाः कथनमस्ति यत् तया ईरान-देशस्य चत्वारि आक्रामक-ड्रोन-विमानानि निपातितानि, तथा च बन्दर-अब्बासक्षेत्रे स्थिते ड्रोन-नियन्त्रण-केन्द्रे भीषणप्रहारः कृतः। अत्रान्तरे ईरानस्य इस्लामिक-रिवोल्यूशनरी-गार्ड-कॉर्प्स इति दलेन अपि एतस्य प्रहारस्य प्रमाणत्वेन प्रोक्तं यत्, प्रतिकारस्वरूपेण तैः अमरीकी सैन्य शिविरे आक्रमणं विहितम्। कुवैत-प्रशासनेन पूर्वमेव सूचितम् आसीत् यत्, ते स्वकीये क्षेत्रे शत्रुपक्षस्य ड्रोन-आक्रमणानां दृढप्रतिकारं कुर्वन्ति। अस्याः सद्योजातायाः सैन्य-उत्तेजनायाः कारणेन वाशिंगटन-तेहरान-नगरयोः मध्ये युद्ध-विरामस्य विस्ताराय जायमानैः कूटनीतिक-प्रयासैः सहसा महती क्षतिः अभवत्।

## सुभाषितम्

**रोगशोकपरिताप-बन्धनव्यसनानि च।**
**आत्मापराधवृक्षाणां फलान्येतानि देहिनाम्॥**

भावार्थः:- रोग, शोक, पश्चाताप, बन्धन और आपत्ति, ये देहधारियों (प्राणियों) के लिए अपने अपराधरूपी वृक्ष के फल हैं।




सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य समुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## गृहमन्त्री अमित शाहः गान्धिनगरे जनसभायां अवैध प्रवासिनां देशात् निष्कासनार्थं सर्वकारस्य दृढसङ्कल्पं पुनः प्रत्यपादयत्

केन्द्रीय-गृह-सहकारिता-मन्त्री अमितशाहः गतदिवसे पुनरेकदा अवैध-प्रवासिनाम् अभिज्ञानार्थं, निर्वासनार्थं, सीमा सुरक्षां सुदृढीकर्तुं च सर्वकारस्य प्रतिबद्धतां पुनरपि दृढतया विकास-प्रतिपादितवान्। गान्धीनगरे चत्वारिंशदधिकत्रिशत-कोटिरूप्यकाणां परियोजनानाम् उद्घाटनस्य शिलान्यासस्य च अनन्तरं जनसभां सम्बोधयन् श्रीशाहः पश्चिमबङ्गाल-सर्वकारस्य अपि प्रशंसाम् अकरोत्, यतः एकसप्ताहाभ्यन्तरे सीमा-सुरक्षा-बलाय षट्शतं हेक्टर्-परिमिता भूमिः प्रदत्ता। वीर सावरकरमहोदयस्य जन्म-वार्षिक्याः अवसरे गृहमन्त्री तस्य योगदानाय त्यागाय च तस्मै श्रद्धाञ्जलिं प्रदत्तवान्।

# हिमाचल-पञ्चायत-निर्वाचनम्- प्रदेशस्य वयोवृद्धः ११६ वर्षीयः खड़कू रामः मतदानकेन्द्रं गत्वा मतदानं कृतवान्, तस्य उत्साहं प्रति सादरं नमनम्



हिमसंस्कृतवार्ताः- हमीरपुरम्। हिमाचलप्रदेशे पञ्चायतीराजसंस्थानां द्वितीयचरणस्य निर्वाचने शतायुमतदातृभिः लोकतन्त्रं प्रति स्वदायित्वस्य अद्भुतम् उदाहरणं प्रस्तुतम्। शतवर्षादधिकवयोवृद्धाः मतदातारः मतदानकेन्द्राणि प्राप्य स्वमताधिकारस्य प्रयोगं कृतवन्तः, युवापीढीं च मतदानार्थं प्रेरितवन्तः। हमीरपुरस्य दशमल-पञ्चायतस्य द्वितीयवार्डनिवासी ११६ वर्षीयः खड़कू रामः गुरुवासरे मतदानं कृत्वा युवकानामन्तिके सन्देशं प्रेषितवान्। दावा क्रियते यत् खड़कू रामः प्रदेशस्य वयोवृद्धतमः मतदाता अस्ति। भोरञ्जमण्डलस्य एसडीएम शशिपालशर्मा मतदानकेन्द्रं गत्वा खड़कू रामस्य साहसस्य प्रशंसां कृतवान्। सः मतदानकेन्द्रं प्राप्य तस्य कुशलवार्तां पृष्टवान्, लोकतन्त्रं प्रति तस्य जागरूकतायाः श्लाघनां च कृतवान्। सः अवदत् यत् खड़कू राम सदृशाः वरिष्ठनागरिकाः समाजाय प्रेरणास्वरूपाः सन्ति। खड़कूरामः राजकीय- प्राथमिक- पाठशाला- जाड़ इति द्वितीयसङ्ख्यके मतदानकेन्द्रे स्वमतं समर्पितवान्। तस्य मतदानजागरूकतां उत्साहं च दृष्ट्वा मतदानकेन्द्रे उपस्थिताः अधिकारिणः मतदातारः च प्रभाविताः अभवन्। मतदानान्तरं सः अवदत् यत् लोकतन्त्रस्य साफल्यार्थं प्रत्येकं नागरिकेण अवश्यमेव मतदानं करणीयम्। सः विशेषरूपेण युवकान् आह्वयन् अवदत् यत् ते स्वकीयस्याधिकारस्य प्रयोगं कुर्युः, सुदृढलोकतन्त्रस्य निर्माणे च भागिनः भवेयुः। अस्मिन् अवसरे द्वितीयवार्ड-मतदानकेन्द्रस्य पीठासिनाधिकारी त्रिलोकचन्द डोगरा, मतदान- अधिकारिणी विद्यादेवी, निर्मलादेवी, प्रवीण कुमारः, सुरक्षाकर्मी धर्मपालः च उपस्थिताः आसन्। झण्डूता- पञ्चायतस्य सुन्हाणी-वार्डस्य (द्वितीयसङ्ख्यकस्य) १०५ वर्षीया मनसा देवी अपि बूथं प्राप्य स्वमताधिकारस्य प्रयोगं कृतवती। बिलासपुरस्य कसारू-ग्रामपञ्चायतस्य १०८ वर्षीया रूपादेवी, दकड़ी-पञ्चायतस्य १०७ वर्षीया मनभरू देवी, हरनोड़ायाः १०६ वर्षीयः सन्तरामः, बल्हसीणा-पञ्चायतस्य १०० वर्षीया नरैण देई च मतदानकेन्द्रं गत्वा मतदानं चक्रुः।

### आक्सीजन-सिलिण्डर-सहायेन मतदानकेन्द्रं प्राप्य वरिष्ठनागरिकेण पालितं लोकतन्त्रकर्तव्यम्

जुखालाक्षेत्रस्य नलवाड़मतदानकेन्द्रे एकः वरिष्ठनागरिकः अस्वस्थतायाः सत्यपि आक्सीजन- सिलिण्डरस्य सहायेन मतदानकेन्द्रं प्राप्य स्वमताधिकारस्य प्रयोगं कृतवान्। तस्य एतां कर्तव्यनिष्ठां दृष्ट्वा मतदानकेन्द्रे उपस्थिताः जनाः भावुकाः अभवन्। जिला-निर्वाचनाधिकारी (पञ्चायत) उपायुक्तः राहुलकुमारः शतायु- अस्वस्थ- वृद्धमतदातृणाम् उत्साहं प्रशंसन् अवदत् यत् लोकतन्त्रस्य अस्मिन् महापर्वणि तेषां सहभागिता समाजाय प्रेरणादायिका अस्ति।

### दिव्यांगमतदातृभिः अपि मतदाने प्रदर्शितः महोत्साहः

पञ्चायतीराजसंस्थानां निर्वाचनस्य द्वितीये चरणे हमीरपुरजनपदस्य ८२ ग्रामपञ्चायतेषु गुरुवासरे अभूते मतदाने दिव्यांगमतदातृभिः अपि भृशं उत्साहः प्रदर्शितः। विकासखण्ड- बिझड़ी- अन्तर्गतायाः चकमोह-पञ्चायतस्य पञ्चमसङ्ख्यके बूथकेन्द्रे दिव्यांगः आनन्दशर्मा स्वमतं प्रदत्तवान्। अपरपक्षे, तालपञ्चायतस्य अन्तर्गतं दिव्यांगः प्रीतमचन्दः धरनासी-बूथकेन्द्रे स्वमताधिकारस्य प्रयोगं कृतवान्। एवमेव जनपदस्य अन्येषु मतदानकेन्द्रेषु अपि जनैः पूर्णोत्साहेन स्वमताधिकारस्य उपयोगः कृतः।

## विजयपुरबूथकेन्द्रे श्वः परिवारेण सह मतदानं करिष्यति जेपी नड्डा

केन्द्रीयस्वास्थ्य एवं परिवारकल्याणमन्त्री, भाजपायाः वरिष्ठनेता च जगत् प्रकाश नड्डा ३० मई दिनाङ्के बिलासपुरजनपदस्य विजयपुरे पञ्चायतनिर्वाचने स्वमताधिकारस्य प्रयोगं करिष्यति। भाजपायाः प्रदेश-सह-मीडियाप्रभारी स्वदेशठाकुरः अवदत् यत् नड्डा राजकीय- प्राथमिक- पाठशाला- विजयपुरस्थे स्वकीये बूथकेन्द्रे परिवारेण सह मतदानं करिष्यति। निर्धारितकार्यक्रमानुसारं सः शुक्रवासरस्य सायं प्रायः षड्वादने विजयपुरं प्राप्स्यति। अग्रिमे दिने ३० मई दिनाङ्के सः दिनभरं स्थानीयकार्यक्रमेषु भागं गृहीत्वा सायं प्रति दिल्लीं गमिष्यति। भाजपानेतृणां मते जेपी नड्डा महोदयस्य एषः प्रवासः सङ्घटनात्मकदृष्ट्या अपि महत्त्वपूर्णः मन्यते। नड्डा महोदयस्य मीडियाप्रभारी अवदत् यत् भाजपा सदैव लोकतान्त्रिकमूल्यानां सुदृढीकरणाय, अधिकाधिकमतदानार्थं च जनान् प्रेरितुं कार्यं करोति।

# उपमुख्यमन्त्रिणः दुर्गे भाजपा-समर्थितस्य लखबीरसिंहस्य अनुप्रवेशः, मुकेश-महोदयस्य पितृव्यपुत्रः पराजितः



हिमसंस्कृतवार्ताः - ऊना। हिमाचलप्रदेशस्य राजनीतिवृत्याम् तस्मिन् समये एकं नवीनं परिवर्तनं दृष्टम्, यदा उपमुख्यमन्त्रिणः मुकेश-अग्निहोत्रिणः गृहपञ्चायते 'गोंदपुर जयचंद' इत्यत्र भाजपा-दलेन एकः महान् राजनैतिकः अनुप्रवेशः कृतः। पञ्चायतीराजनिर्वाचने भाजपा-दलस्य मण्डल-महामन्त्री लखबीरसिंह लक्खी महोदयः काङ्ग्रेस-समर्थितप्रत्याशिनं तथा च उपमुख्यमन्त्रिणः पितृव्यपुत्रं (चचेरे भाई) अनूप-अग्निहोत्रिं १४४ मतानां महता अन्तरेण पराजित्य राजनैतिकक्षेत्रेषु नवीनां चर्चां प्रारब्धवान्। एषः परिणामः केवलं कस्याश्चित् एकस्य पञ्चायतस्य वा जिलापरिषद-आसनस्य जय-पराजयस्य न मन्यते, अपितु एषः हरोली-विधानसभाक्षेत्रे परिवर्तमानस्य राजनैतिकसमीकरणस्य सङ्केतत्वेन दृश्यते। भाजपा-पक्षेण एषः विजयः सङ्घटनस्य सुदृढतायाः कार्यकर्तृणां च कठोरपरिश्रमस्य परिणामः इति कथितः। लखबीरसिंह लक्खी पूर्वमपि जिलापरिषद-सदस्यः आसीत्। एतदतिरिच्य सः भाजपा-पूर्वसैनिकप्रकोष्ठस्य मण्डलसंयोजकत्वेन अपि दायित्वं निर्वहति। सः सुदीर्घकालात् क्षेत्रे सक्रियराजनीतौ कार्यरतः अस्ति। भाजपा-नेतृणां कथनं अस्ति यत् एषः परिणामः सूचयति यत् केवलं महतां विकासकार्याणां वा सर्वकारीयपदस्य प्रभावः एव निर्वाचनं न जितं भवति, अपितु भूमिगतसम्पर्कः स्थानीयविषयाणाम् अवगमनं च अत्यधिकं महत्त्वपूर्णं भवति।

## क्रीडावार्ता

### महिला-एकल-क्रीडायाः षोडश-चक्रे पी.वी. सिन्धुः जापान-देशस्य रीको गुज्जीं एकविंशतिः-नव, एकविंशतिः-द्वादशः इत्यङ्कान्तरालेन पराजितवती




सिङ्गापुर-ओपन्-बैडमिण्टन्-प्रतिस्पर्धायां गतदिवसः भारतस्य कृते अतीव गौरवपूर्णः आसीत्। भारतस्य प्रमुख-क्रीडकाः लक्ष्य-सेनः, पी.वी. सिन्धुः, चिराग-शेट्टी-सात्त्विकसाईराज-रङ्कीरेड्डी इत्यनयोः पुरुष-युगलदलं, तथा च ध्रुव-कपिला-तनीषा-क्रैस्टो इत्यनयोः मिश्रित-युगलदलं च स्व-स्व-प्रतिस्पर्धासु विजयं प्राप्य प्रागुपान्त्य-चक्रे प्रविष्टवन्तः। महिला-एकल-क्रीडायाः षोडश-चक्रे पी.वी. सिन्धुः जापान-देशस्य रीको गुज्जीं एकविंशतिः-नव, एकविंशतिः-द्वादशः इत्यङ्कान्तरालेन पराजितवती । आगामि-स्पर्धायां सा दक्षिण-कोरिया-देशस्य एन-से-यङ्ग इत्यनेन सह स्पर्धिष्यति।
अत्रान्तरे, पुरुष एकल-क्रीडायाम् थाईलैण्ड-देशस्य द्वितीय-वरीयता-प्राप्तः क्रीडकः कुनलावुत वितिदसार्नः स्पर्धायाः आरम्भे एव आहतो भूत्वा क्रीडाङ्गणात् बहिर्जातः, येन लक्ष्य-सेनः अनायासेनैव स्वकीयं स्थानं सुरक्षितवान्।अपरतः, पुरुष-युगल-क्रीडायां सात्त्विकसाईराज-चिराग-शेट्टी द्वन्द्वेन अपि ताइवान-देशस्य 'ली-झे-हुई' सहैव 'याङ्ग पो-सुआन' इत्येतयोः युगलं पराजित्य भारतस्य स्थितिः सुदृढीकृता ।

### प्रधानमन्त्रिणः नरेन्द्रमोदिनः वियतनामस्य 'दा नांग' नगरे आयोजितायाम् २०२६ 'अण्डर-२३' एशियाई-मल्लयुद्ध-प्रतियोगितायां भारतीयमल्लानामुत्तमप्रदर्शने वर्धापनं दत्तवन्तः



सामाजिक-माध्यमे (सोशल मीडिया) एकां घोषणाम् कुर्वन् श्रीमोदी अवदत् यत्- पुरुष-फ्रीस्टाईल तथा महिला-मल्लयुद्ध-दलाभ्यां प्रतियोगितायां सामूहिकं शीर्षस्थानं (टीम खिताब) प्राप्तम्। तेन उक्तं यत् पुरुष-फ्रीस्टाईल-मल्लयुद्ध-दलेन चतुरः सुवर्णपदकान् विजित्य आहत्य नव पदकानां नूतनः कीर्तिमानं रचितः, यः अस्याः प्रतियोगितायाः इतिहासे देशस्य इदानीं यावत् सर्वाधिकः अस्ति। प्रधानमन्त्रिणा अग्रे उक्तं यत् महिला-मल्लयुद्ध-दलेनापि षट् सुवर्णपदकैः सह आहत्य दश पदकानि विजित्य प्रशंसनीयं प्रदर्शनं कृतम्। तेन एतदपि सूचितं यत् ग्रीको-रोमन-दलेनापि अष्टभिः पदकैः सह अस्याम् प्रतियोगितायाम् इदानीं यावत् स्वस्य सर्वश्रेष्ठं प्रदर्शनं विहितम्।

# "विश्वबैङ्क" इत्यनेन सह ऋणानुबन्धाय स्वीकृतिः

## आपदा-आश्रयस्य २६८७ कोटिरूप्यकाणां 'एच.पी. रेडी' (HP READY) परियोजनायाः मन्त्रिमण्डले समीक्षा




**हिमसंस्कृतवार्ताः - शिमला।** प्रदेशसर्वकारेण आपदा-आश्रयार्थं विश्वबैङ्कतः प्राप्तायै २६८७ कोटिरूप्यकाणां परियोजनायै ऋणानुबन्धे (लोन एग्रीमेंट) हस्ताक्षरं कर्तुं स्वीकृतिः प्रदत्ता। एषा स्वीकृतिः मन्त्रिमण्डलस्य उपवेशने परियोजनायाः समीक्षायाः परं दत्ता अस्ति। यद्यपि अस्यां परियोजनायाम् एषः अनुबन्धः इदानीं यावत् हस्ताक्षरितः भवितव्यः आसीत्, किन्तु परियोजना-निदेशकस्य पदे निरन्तरं जायमानानां परिवर्तनानां कारणात् अस्मिन् विलम्बः अभवत्। अधुना एषः विषयः गत-मन्त्रिमण्डलस्य उपवेशनस्य सम्मुखं स्थापितः आसीत्। अस्याः परियोजनायाः नाम 'एच.पी. रेडी' (HP READY) अर्थात् हिमाचलप्रदेश-विकास-आपदा-पुनरुत्थान-अनुकूल-कार्य-परियोजना ('हिमाचलप्रदेश रिजीलियंट एक्शन फोर डिवेलपमेंट एंड डिजास्टर रिकवरी प्रोजेक्ट') इति दत्तम् अस्ति। एतत् २०२५ तमे वर्षे प्राकृतिकविपदा सञ्जातस्य क्षतेः पूरणाय अस्ति। राज्यसर्वकारेण एषा परियोजना २०२६ तः २०३१ पर्यन्तं पूर्णा करणीया अस्ति।

एषा परियोजना आहत्य ३१२ मिलियन डॉलर परिमिता अस्ति। अस्मात् २० प्रतिशतं अर्थात् ६२ मिलियन डॉलर परिमितं राज्यसर्वकारस्य भागः (अंशः) भविष्यति। हिमाचलप्रदेशे आपदा-आश्रयार्थं जलवायुपरिवर्तनेन च उत्पद्यमानानां सङ्कटानां निवारणाय प्रारब्धा 'एच.पी.-रेडी' परियोजना विश्वबैङ्कस्य राज्यसर्वकारस्य च संयुक्तः प्रयासः अस्ति। एषा परियोजना विशेषरूपेण मेघविस्फोटः, भूस्खलनम्, आकस्मिकजलप्लावन (फ्लैश फ्लड) तथा अन्याभिः प्राकृतिकविपद्भिः प्रभावितेषु क्षेत्रेषु पुनर्निर्माणाय भविष्यस्य आपद्भ्यः श्रेष्ठसज्जतायै च निर्मिता अस्ति। राज्यसर्वकारस्य अनुसारं २०२३ तः २०२५ वर्षद्वयाभ्यन्तरे हिमाचले ८६ मेघविस्फोटाः, २३४ भूस्खलनानि तथा १२१ आकस्मिकजलप्लावनस्य घटनाः अभवन्, याभिः १२५०० कोटिरूप्यकाणाम् अपेक्षया अधिकं नुकसानं (क्षतिः) अभवत्। अस्य पुनरुत्थानाय अस्याः परियोजनायाः कुलव्ययः प्रायः २६८७ कोटिरूप्यकाणि वर्तते। एषा विश्वबैङ्कस्य सहयोगेन क्रियते।

### आपद्भ्यः सुदृढा व्यवस्था

अस्याः परियोजनायाः प्रमुखाः उद्देश्याः आपदाप्रभावितानां आधारभूतसंरचनानां पुनर्निर्माणम्, मार्गाः, सेतवः (पुल), पेयजलपरियोजनाः, विद्युत्परियोजनाः, शासकीयभवनानां निर्माणेन सह भविष्यस्य आपद्भ्यः सुदृढा व्यवस्था तथा पूर्वसचेतना-तन्त्रं (अर्ली वार्निंग सिस्टम) सज्जीकरणं च अस्ति। एतेन सह नदी-नालानां वैज्ञानिकं प्रबन्धनम्, भूस्खलन-जलप्लावन-सङ्कट-मानचित्रणम् (फ्लड रिस्क मैपिंग), आपदाप्रबन्धनक्षमतायाः वर्धनम्, आजीविकायाः ग्रामीणअर्थव्यवस्थायाः च सुरक्षा, कृषकाणां उद्यानपालानां च कृते सुरक्षिता अधोसंरचना (इंफ्रास्ट्रक्चर), नियन्त्रितवातावरण (सी.ए.) भण्डारं तथा 'हरितपञ्चायत्' सदृशानां प्रयोगाणां प्रारम्भः अस्ति।

# अंतरराष्ट्रीय-व्यापार-नवोद्यम-उद्यमी-संघस्य तत्वावधानतः भारतीय-प्रौद्योगिकी-संस्थाने, दिल्ली-नगरे"निर्देशक-मार्गदर्शक-सम्मेलन-द्वितीयम्" इति महत्-समारोहः सफलतया सम्पन्नः

## "विकसित-भारत-चतुरशीत्यधिक-द्विसहस्र-एकविंशति" नवोन्मेषः, वैश्विक-उद्यमिता, युवा-नेतृत्वं च विषयेषु राष्ट्रव्यापी विमर्शः



**हिमसंस्कृतवार्ता, राघव नाथ झा।** अंतरराष्ट्रीय-व्यापार-नवोद्यम-उद्यमी-संघस्य तत्वावधानतः भारतस्य परम-प्रतिष्ठिते शिक्षण-संस्थाने भारतीय-प्रौद्योगिकी-संस्थाने, दिल्ली-नगरे स्थिते सभागारे महता-गरिमायुक्तेन, ज्ञानवर्धकेन, प्रेरणाप्रदेन च आयोजनेन "निर्देशक-मार्गदर्शक-सम्मेलन-द्वितीयम्" इति नाम्ना बृहत्-संगोष्ठी सफलतया सम्पन्ना अभवत्। एषः राष्ट्रीय-अन्तरराष्ट्रीय-स्तरीयः बौद्धिक-संवाद-समारोहः "विकसित-भारत-चतुरशीत्यधिक-द्विसहस्र-एकविंशति" इति राष्ट्र-संकल्पस्य सिद्ध्यर्थं नवोन्मेष-प्रौद्योगिकी-उद्यमिता-नेतृत्व-शिक्षा-अनुसन्धान-नवोद्यम-संस्कृति-राष्ट्रनिर्माण-सम्बद्धेषु विषयेऽu गम्भीर-विमर्शस्य श्रेष्ठ-मञ्चत्वेन प्रतिष्ठितः अभवत्।

अस्मिन् महति आयोजने देश-विदेशेभ्यः समागताः शिक्षाविदः, उद्योग-विशारदाः, नीति-निर्मातारः, वैज्ञानिकाः, नवोद्यमिनः, शोधकर्तारः तथा विविध-विषयेषु प्रबुद्ध-प्रतिनिधयः च समुपस्थिताः सन्तः स्वकीय-विचारान् प्रस्तुतवन्तः, यैः राष्ट्रस्य "विकसित-भारत" इति संकल्पस्य पूर्त्ये सुदृढा दिशा प्रदत्ता।कार्यक्रमे शिक्षण-संस्थानानाम्, उद्योग-जगतः, तथा अनुसन्धान-नवोन्मेष-आधारित-उद्यमानां मध्ये सुदृढ-सहकार-समन्वय-स्थापनाय विशेषः बलः दत्तः। युवाशक्तेः वैश्विक-अवसरैः सह संयोजनाय च भारतस्य ज्ञान-विज्ञान-प्रौद्योगिकी-क्षेत्रेषु विश्व-नेतृत्व-पदप्राप्त्यै सामूहिक-प्रयत्नानां अनिवार्यता प्रतिपादिता।अस्मिन् अवसरे संघस्य अध्यक्षेन डॉ. अंशुमान-सिंहेन उक्तम्—"भारतदेशः अद्य केवलं उपभोग-प्रधानं राष्ट्रं न, अपितु ज्ञान-विज्ञान-नवोन्मेष-युवा-शक्ति-संवलितं उदीयमानं विश्व-नेतृत्वाभिमुखं राष्ट्रं जातम् अस्ति।" सः पुनः प्रतिपादितवान् यत् आगामि-कालः नवोन्मेष-आधारित-उद्यमिता-प्रौद्योगिकी-संयोजित-उत्तरदायी-उद्यम-व्यवस्थायाः भविष्यति, यस्मिन् भारतीय-युवशक्तिः विश्व-समाजाय नूतनां दिशां प्रदास्यति।तेन एव उक्तं यत् शिक्षण-संस्थानानि, उद्योग-जगत्, नवोन्मेष-मञ्चाः च एतेषां मध्ये सुदृढ-संयोजनमेव आत्मनिर्भर-भारत-निर्माणस्य मूलाधारः भविष्यति। उद्यमितां केवलं आर्थिक-क्रियायाः रूपे न दृष्ट्वा सामाजिक-परिवर्तन-कौशल-विकास-रोजगार-सृजन-राष्ट्रहित-संवर्धन-रूपेण च स्थापयितव्यम् इति वर्तमान-समयस्य परमावश्यकता अस्ति।सम्मेलने उपस्थितैः विद्वद्भिः विशेषज्ञैः च ज्ञान-विनिमयः, वैश्विक-सहकारः, प्रौद्योगिकी-उन्नयनम्, अनुसन्धान-विकासः, नवोद्यम-संस्कृति-विस्तारः, नवोन्मेष-वर्धनम्, उत्तरदायी-नेतृत्व-निर्माणम् इत्यादिषु विषयेऽu गहन-विचाराः प्रस्तुताः। वक्तृभिः विशेषतः प्रतिपादितं यत् भारतस्य भविष्यं केवलं आर्थिक-वृद्ध्या न, अपि तु ज्ञान-संस्कृति-विज्ञान-नवोन्मेष-मानवीय-मूल्य-संयोगेन एव समुज्ज्वलं भविष्यति।अस्मिन् गरिमामये आयोजने निम्नलिखिताः विशिष्टाः विद्वांसः शिक्षाविदः च सहभागिनः आसन्—राजकुमार-श्रीवास्तवः (भारतीय-विदेश-सेवा), सुशीलकुमार-सिंघलः, डॉ. आर. पद्मनाभनः, डॉ. तपस-दे, डॉ. अमरेन्द्र-पाणिः, डॉ. शिखा-धवनः, डॉ. पूनम-वर्मा, प्रोफेसर-सौरभ-त्रिवेदी, डॉ. नीलाद्रि-चौधुरी, आलूर-चिन्मय-साई-गणेशः (हैदराबाद-नगरम्), मोहम्मद-शहजाद-आलमः, राहुल-झा इत्यादयः अनेकाः प्रबुद्ध-विद्वांसः उपस्थिताः आसन्।कार्यक्रमस्य समापनावसरे आयोजकानां प्रति सफल-सुव्यवस्थित-आयोजनाय कृतज्ञता-प्रकाशनं कृतम्। उपस्थितैः प्रतिभागिभिः एतादृशाः बौद्धिक-प्रेरणादायकाः आयोजनाः विकसित-आत्मनिर्भर-ज्ञानसमृद्ध-विश्वगुरु-भारतस्य निर्माणे परमोपयोगिनः इति मतं व्यक्तम्।



# त्वं मे रात्रौ गलाहारः

त्वं मे रात्रौ गलाहारःप्रभाते नहि दृश्यसे
चन्द्रिका सर्वरात्रीणां दिवसे क्वापि लीयसे ।१।
त्वामन्विष्य लभे नो वै विरहश्वसनं भरे
यदि त्वमिह सम्प्राप्ता जगत्सर्वञ्च मे करे ।२।
किं त्वं मे चपला कान्ता मनसि मे त्वनारता
कदाचिद्दर्शने प्रीता कदापि नहि सङ्गता ।३।
ग्रहीतुं हस्तमुद्यम्य त्यक्त्वा माञ्च पलायसे
तव तर्षे समाकर्षे विरह्यहं क्व नो वशे ।४।
मा तापय न बाधस्व त्वायाहि गृहिणी भव
पुष्पशय्यां समीकृत्य तिष्ठामि स्वागते तव ।५।

**रचयिता - आचार्यः डा.रुरुकुमारमहापात्रः**
**राष्ट्रियसंस्कृतविश्वविद्यालयः,तिरुपतिः**

### लोकतन्त्रं संवाद-विचारविमर्श-
## सर्वसम्मति-असम्मतीनां वातावरणे विकसति

लोकसभाध्यक्षः ओम बिरला महोदयः उक्तवान् यत् लोकतन्त्रं संवाद-विचारविमर्श-सर्वसम्मति-असम्मतीनां वातावरणे विकसति। दिल्ली-विधानसभा-भवने १९२४ (चतुर्विंशत्युत्तर-एकोनविंशतिशततमे) वर्षतः १९३० (त्रिंशदुत्तर-एकोनविंशतिशततमे) वर्षं यावत् केन्द्रीय-विधानसभायाः सर्वासामपि ४०७ (सप्ताधिक-चतुःशत) उपवेशनानां कार्यवाह्याः ८९ (नवाशीति) खण्डानां विशिष्ट-सङ्कलनस्य अद्य विमोचनं कुर्वन् सः एतद् अकथयत्।श्री बिरला अवदत् यत् एषः सङ्ग्रहः आगामिपीढीनां कृते लोकतान्त्रिकसंस्थानां कृते च एकः अमूल्यः मार्गदर्शकः सिद्धः भविष्यति।

# राजस्थानस्य भीलवाड़ा-मण्डलस्य पुत्री सपना कुँवर राठौड़ मण्डलस्य गौरवम् अवर्धयत्, उच्च- प्राथमिक- शिक्षक- नियुक्ति- परीक्षायां गणित-विज्ञानविषये समग्रे राजस्थाने सप्तदशं (१७) स्थानं प्राप्तवती



**हिमसंस्कृतवार्ताः-** राजस्थानम्भीलवाड़ा-मण्डलस्य साङ्गवा-ग्रामस्य प्रतिभाशाली पुत्री सपना कुँवर राठौड़ उच्च- प्राथमिक- शिक्षक- नियुक्ति- परीक्षायां भव्यां सफलतां प्राप्य समग्रे राजस्थाने सप्तदशं स्थानं लब्धवती, येन सा ग्रामस्य मण्डलस्य च नाम आलोकितं कृतवती।सपना-महोदयायाः अस्याः सिद्धेः कारणात् परिवारे, ग्रामे, क्षेत्रे च हर्षस्य तरङ्गः अस्ति। तस्याः परिश्रमस्य, निष्ठायाः, निरन्तर-अध्ययनस्य च एषः परिणामः वर्तते यत् सा राज्यस्तरे एतादृशीम् उत्कृष्टाम् श्रेणीं प्राप्तवती। ग्रामीण-परिवेशात् विनिर्गत्य एतादृशीं महतीं सफलतां प्राप्तुम् अन्येषां छात्राणां कृते, विशेषतः पुत्रीणां कृते एषा प्रेरणास्रोतः सञ्जाता। सपना स्व-सफलतायाः श्रेयं मातापितृभ्याम्, गुरुजनेभ्यः, परिवारस्य सहयोगाय च दत्तवती। सा कथयति यत् सामान्यज्ञाने जगदीशजाट-महोदयस्य, तस्याः आत्मीयस्य (जीजाजी) जीवनसिंहमहोदयस्य (उदयपुर) च अतिशयः सहयोगः आसीत्। सम्बन्धिनः ग्रामवासिनः शुभचिन्तकाश्च सपनां प्रति वर्धापनं ज्ञापयन्तः तस्याः उज्ज्वलभविष्यार्थं कामनां कृतवन्तः। इयं सफलता प्रतिपादयति यत् परिश्रमेण आत्मविश्वासेन च कस्यापि लक्ष्यस्य प्राप्तिः कर्तुं शक्यते।



हिमसंस्कृतवार्ता
असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

# संस्कृतं मधुरं सदा- ४३

भगवद्विधानं जगन्मङ्गलाय भवति सदैव। विश्वरक्षकः श्रीपरमात्मा एव, अपरः नान्य कोऽपि। यतोहि सृष्टिरचना अपि तस्यैव। आवश्यकतायां सत्याम् अस्य जगतः विध्वंसोऽपि तस्यैव आधिन्ये वर्तते। जगति यत्किमपि घटनापरिघटनादिकं सञ्जायते, तत्सर्वं भगवदिच्छया हि सम्भवति ; तस्य भगवतः इच्छया विना तु एकं वृक्षपत्रमपि न कम्पेत कदाचिदपि। एतदपि सत्यं यत् श्रीभगवान् परमः दयालुः वर्तते; सः समस्तजगतः कल्याणं हि इच्छतीति। सः न कदापि इच्छति यत् जगति प्राणिनः कष्टं प्राप्नुयुः, तेषां निर्दयतापूर्वकं हत्या भवेत् चेति।
वस्तुतः भगवतः स्वकीया न कापि इच्छा स्यात्। सः स्वरूपतः हि पूर्णकामः एवं कृतकृत्यः वर्तते। यस्य किमपि प्राप्तव्यं कर्तव्यं वा अवशिष्टं स्यात्, सः हि किमपि इच्छेत्, कुर्यात् अथवा तस्य मनसि इच्छायाः कामनायाः वा उदयः भवेत्। भगवदर्थं तु 'नानवाप्तमवाप्तव्यम्' इत्येव स्यात् सदा, तस्य कृते अखिलजगति न किमपि वस्तु अप्राप्तं स्यात्, न वा प्राप्तयोग्यं हि; एवं स्थिते पुनः तस्मिन् इच्छा कथं तिष्ठेत्; एतादृशे इच्छारहिते भगवति इच्छाम् उत्पादयति मनुष्यस्य कर्म हि। मनुष्येण यत् नानाविधं कर्म क्रियमाणं स्यात्, तत्र शुभम् अशुभम् इत्यादिकं सर्वप्रकारकं कर्म सञ्जायते। शुभस्य फलं सुखम्, एवम् अशुभस्य फलं दुःखमिति। यः यादृशं कर्म कुर्यात् सः तादृशं हि फलं प्राप्नुयादिति भगवतः हि निर्दिष्टः नियमोऽयम्। अशुभस्य दण्डविधानन्तु एतदर्थं हि यत् मनुष्यः अशुभात् दूरे तिष्ठेत्। एवं शुभस्य पुरस्कारः एतदर्थमेव यच्च मनुष्यः सर्वदा शुभकर्म हि कुर्यात्। जीवाय दण्डप्रदाने भगवति न वा कोऽपि द्वेषः स्यात्, न वा पुरस्कारप्रदाने कोऽपि रागः हि। सः तु केवलं कर्मफलस्य व्यवस्थामात्रं करोति। अतः तस्मिन् भगवति निर्दयतायाः अथवा विषमतायाः दोषारोपणं कर्तुं न शक्यते; गुणदोषयोः भोक्ता तु स्वयं मनुष्यः हि, यादृशं तस्य कर्म तादृशं हि फलं सः भुङ्क्ते। भगवतः प्रत्येकं कार्यं दयया सम्पूरितं भवति। एवं सत्यपि मनुष्यः स्वयम् असुरः भूत्वा परेषां नरनारीणां क्रूरतया रक्तं स्रावयन् दृश्यते, सः समये आगते सति एतस्य दुष्टकार्यस्य कठोरदण्डम् अवश्यं भुञ्जीत इत्यत्र नैव कापि शङ्का।

**'तानहं द्विषतः क्रूरान् संसारेषु नराधमान्।**
**क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु।।'**

इति गीतावाक्यम्।
अतः भगवतः विधानं सर्वदा लोकमङ्गलाय हि भवतीति शुभम्!

## “अङ्गुलीरेखाः”

### अङ्गुलीरेखाणां दैवीयरहस्यम्

१. मानवस्य अङ्गुलीरेखाः गर्भावस्थायाः चतुर्थमासात् निर्मीयन्ते। तस्मिन् काले शिशुः बाह्यजगतः अतीव दूरं भवति, तथापि तस्य परिचयदायिनी भाषा तस्य शरीरे लिख्यमाना भवति।
२. एतासां रेखाणां रचना DNA-सूचनानुसारं भवति; किन्तु आश्चर्यस्य विषयः अयं यत् एताः रेखाः न मातापितृसदृश्याः भवन्ति, न च पूर्वजानां सदृश्याः।
३. यथा कश्चन अदृश्यः तरङ्गप्रभावः त्वचायाम् एताः रेखाः स्वयमेव अङ्कयति। एतत् कस्यचित् अलौकिकव्यवस्थायाः संकेतं ददाति।
४. प्रत्येकस्य मनुष्यस्य अङ्गुलीरेखाः सम्पूर्णे विश्वे सर्वथा भिन्नाः भवन्ति; अद्यावधि तादृशः कश्चन मनुष्यः न जातः यस्य अङ्गुलीरेखाः अन्येन सह पूर्णतया तुल्याः स्युः।
५. अनेन सिद्धं भवति यत् कश्चन अद्वितीयः “शिल्पकारः” अस्ति, यः प्रतिवारं नूतनां कलाकृतिं निर्माति।
६. यदा विश्वस्य महानपि सङ्गणकः एतादृशीं रचनां निर्मातुं न शक्नोति, तदा एषा रचना मानवबुद्धेः परा इति वक्तुं न दोषः।
७. प्रश्नः उदेति- “मम सदृशीं निर्मितिं कः कर्तुं शक्नोति?” एषः प्रश्नः तस्य अदृश्यशिल्पिनः कलां प्रणमति।
८. यदि दुर्घटना भवेत्, त्वचा दग्धा भवेत्, अथवा रेखाः नश्येयुः, तथापि कालान्तरे ताः एव रेखाः यथावत् पुनरागच्छन्ति। न कापि कोशिका अन्यत्र गच्छति, न च रचनायां परिवर्तनं भवति।
९. अनेन ज्ञायते यत् एताः रेखाः केवलं त्वचायाम् एव न सन्ति, अपि तु अस्तित्वस्य गभीरतमे स्तर उपलिखिताः सन्ति। एषा काचित् आत्मीयप्रतिमा अस्ति।
१०. मानवशरीरस्य अन्यः कश्चन भागः नास्ति यः यथावत् पुनर्निर्मातुं शक्यते; किन्तु अङ्गुलीरेखाः तस्मिन् अपवादरूपाः सन्ति। एतत् दैवीययोजना दर्शयति।
११. अद्यापि विज्ञानम् एतस्य रहस्यस्य सम्पूर्णम् उद्घाटनं कर्तुं न समर्थम्। विज्ञानम् एतत् “Biological Memory” अथवा “Cellular Intelligence” इति वदति; किन्तु आध्यात्मिकदृष्ट्या एषा आत्मनः परिचयः अस्ति।
१२. एतासां रेखाणां वक्राणि, शाखाः, वृत्तानि च सर्वं कस्यचित् विशेषभाषायाः गूढसंकेताः सन्ति, ये केवलं तेषां निर्मात्रा एव ज्ञायन्ते।
१३. अङ्गुलीरेखाः केवलं परिचयस्य साधनं न, किन्तु ब्रह्माण्डस्य नियमाः तथा अस्माकं कर्मकथाः अपि तासु निहिताः सन्ति।
१४. अद्यावधि न किञ्चन तन्त्रज्ञानम्, न कृत्रिमबुद्धिमत्ता, न प्रयोगशाला च एतादृशीः रेखाः निर्मातुं समर्था या वास्तवतः पूर्णतया अद्वितीयाः स्युः।
१५. अनेकाः परम्पराः एताः रेखाः “ईश्वरस्य भाषा” इति मन्यन्ते; अत एव हस्तरेखाविद्या अद्यापि प्रासङ्गिकी च चमत्कारिणी च मन्यते।
१६. यदि अस्माकं परिचयः जन्मपूर्वमेव निश्चितः अस्ति, तर्हि अस्माकं जीवनमपि कदाचित् कस्यचित् “दैवीयलेखस्य” अनुसारं चलति इति सम्भाव्यते।

## "वन्दे संस्कृतमातरम्"
## "लौकिकन्यायकोशः"
## "तृणभक्षणन्यायः"

युद्धे पराजितः मनुष्यः मुखे तृणं गृहीत्वा शत्रोः शरणं गच्छति। मम अभिमानः तृणसमान इति सः द्योतयति। एवं व्यवहारेऽपि अन्तिमम् उपायम् अप्राप्य यदा आत्मसमर्पणं करोति तदा एतस्य प्रवृत्तिर्भवति।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे / महाराष्ट्रम्**



# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। अद्य वार्ता-पत्रे मया बहु-विचित्रं वृत्तं पठितम्।
**नन्दिनी-** आम्, मया अपि एकं विचित्रं वृत्तं ज्ञातम्। केनचित् क्लॉड- नामक- कृत्रिमबुद्धितन्त्रस्य साहाय्येन उत्तरप्रदेशे स्व-पूर्वजानां भूमिः प्राप्ता इति प्रकटितम्।
**काव्या-** सत्यम्! एतत् तु अतीव आश्चर्यकरम्। कृत्रिमबुद्ध्या तस्य साहाय्यं कृतम्, तत् उत्तमम्। किन्तु बेङ्गलूरुनगरे वस्त्र-समीकरणस्य मूल्यं दृष्ट्वा केनचित् नोएडा-वासिना महान् विस्मयः अनुभूतः। सः अधुना एव तत्र गतवान्।
**नन्दिनी-** आम्, बेङ्गलूरु-नगरे वस्त्र-समीकरणाय तावत् धनं तु अत्यधिकम् एव! एतेन सम्बद्धा अन्या अपि एका वार्ता अस्ति। न्यूनतम- जीवनशैल्याः कृते प्रतिमासं पञ्चाशीति- सहस्र-रूप्यकाणां व्ययः भवति इति केनचित् अन्तर्जाले कथितम्। एतद् दृष्ट्वा जनैः महती चर्चा आरब्धा।
**काव्या-** सत्यम्, पञ्चाशीति-सहस्र-रूप्यकाणि तु न्यूनतम-जीवनाय कथम् आवश्यकानि भवेयुः इति जनैः चिन्तितम्। एषा तु महती धन-राशिः अस्ति! अपरपक्षे, बाङ्गलादेशे अन्तर्जालप्रसिद्ध्या 'डोनाल्ड ट्रम्प' नामकः एकः महिषः ईद-पर्वणि बलिदानात् रक्षितः।
नन्दिनी- अहो! महिषेण अन्तर्जाले प्रसिद्धिः प्राप्ता, सः च रक्षितः इति अतीव सुखदं वृत्तम्। तस्य रूपं दृष्ट्वा जनैः तस्मै 'डोनाल्ड-ट्रम्प' इति नाम दत्तम्। सः बलिदानात् मुक्तः जातः इति श्रुत्वा मया सन्तोषः अनुभूतः।



लेखकः- डॉ विमलेश झा, गंगौली,राजे, मधुबनी, बिहार

# विश्वे बुभुक्षायाः स्थितिः(दिवसविशेषः)

अन्नं मानवजीवनस्य मूलाधारः अस्ति। यथा जलं विना जीवनं न सम्भवति, तथैव अन्नं विना जीवः जीवितुं न शक्यते। भारतीयसंस्कृतौ "अन्नं ब्रह्म" इति उक्त्वाअन्नस्य महत्त्वं प्रतिपादितम् अस्ति। तथापि अत्याधुनिकविज्ञानप्रगतेः, औद्योगिकीकरणस्य, वैश्विकसमृद्धेः च युगे अपि विश्वस्य बहुषु भागेषु जनाः बुभुक्षया पीडिताः सन्ति। एषा स्थितिः केवलं आर्थिकसमस्या न, अपितु सामाजिक, नैतिक, राजनैतिक तथा मानवीय संकटस्य प्रतीकः अस्ति।विश्वे प्रतिदिनं कोटिशः जनाः पर्याप्तं भोजनं न प्राप्नुवन्ति। अनेके बालकाः कुपोषणेन पीडिताः भवन्ति। कतिपयेषु देशेषु युद्धम्, कतिपयेषु देशेषु जलवायुपरिवर्तनम्, अन्यत्र निर्धनता, जीविकोपार्जनसमस्याः, असमानता च बुभुक्षायाः मुख्यकारणानि सन्ति। अद्यतने समये बुभुक्षासमस्या सम्पूर्णमानवसमाजस्य कृते महती समस्या अस्ति।"बुभुक्षा" इति शब्दः केवलं भोजनाभावं न सूचयति। यदा मनुष्यः पर्याप्तमात्रायां पौष्टिकभोजनं न प्राप्नोति तदा सः बुभुक्षया पीडितः कथ्यते। अस्यां स्थितौ शरीरेण आवश्यकपोषकतत्त्वानि न प्राप्यन्ते, फलतः कुपोषणम्, दुर्बलता, रोगाः च उत्पद्यन्ते।
बुभुक्षायाः द्वे प्रमुखे अवस्थे स्तः— तीव्रबुभुक्षा — यदा जनाः कतिपयानि दिनानि पर्याप्तमन्नं न प्राप्नुवन्ति। दीर्घकालिकबुभुक्षा — यदा दीर्घकालपर्यन्तं न्यूनपोषणयुक्तं भोजनं प्राप्यते।
दीर्घकालिकबुभुक्षया शरीरस्य तथा मस्तिष्कस्य विकासः बाध्यते।

# विश्वे बुभुक्षायाः वर्तमानस्थितिः

अद्य विश्वस्य अनेकदेशेषु अन्नस्य पर्याप्तमात्रा उत्पाद्यते, तथापि तस्य न्यायपूर्णवितरणं न भवति। केचन जनाः अत्यधिकं भोजनं नष्टयन्ति, अपरत्र कोटिशः जनाः एककालभोजनमपि न प्राप्नुवन्ति। विशेषतः आफ्रिकाखण्डे, एशियायाः कतिपयेषु भागेषु, युद्धग्रस्तदेशेषु च बुभुक्षासमस्या अत्यन्तं गम्भीरा अस्ति।
संयुक्तराष्ट्रस्य प्रतिवेदनानुसारं विश्वे लक्षशः बालकाः कुपोषणेन पीडिताः सन्ति। विशेषतः बालकानां मृत्युप्रतिशतः बुभुक्षया सम्बद्धः अस्ति। आफ्रिकाखण्डस्य बहवः देशाः बुभुक्षासंकटे निमग्नाः सन्ति। विशेषतः सोमालिया, सूडान,इथियोपिया,चाड एतेषु देशेषु अनावृष्टिः, युद्धम्, निर्धनता, राजनितिकअस्थिरता च प्रमुखकारणानि सन्ति। अनेके बालकाः अस्थिपञ्जरसदृशाः दृश्यन्ते। भोजनाभावात् तेषां शारीरिकविकासः न भवति। कतिपये प्रदेशाः "दुर्भिक्षक्षेत्राणि" इति कथ्यन्ते।एशियाखण्डे जनसंख्या अत्यधिकास्ति। अतः अन्नस्य आवश्यकता अपि बहु अस्ति। भारत, पाकिस्तान,बांग्लादेश, अफगानिस्तान इत्यादिषु देशेषु निर्धनता तथा कुपोषणस्य समस्या दृश्यते। विशेषतः ग्रामीणक्षेत्रेषु बहवः परिवाराः सम्यक्पोषणं न प्राप्नुवन्ति। महिलाः तथा बालकाः अधिकं प्रभाविताः भवन्ति।
**बुभुक्षायाः कारणानि** -युद्धं बुभुक्षायाः प्रमुखकारणेषु अन्यतमः अस्ति। यदा युद्धं भवति तदा कृषिक्षेत्राणि नश्यन्ति। अन्नभण्डाराः विनश्यन्ति। व्यवसायः स्थगितः भवति।जनाः पलायनं कुर्वन्ति।फलतः अन्नस्य अभावः जायते। उदाहरणरूपेण यूक्रेन तथा रुस इत्यनयोः देशयोः युद्धेन विश्वस्य अन्नापूर्तिशृङ्खला प्रभाविताभवत्। अनेकदेशेषु गोधूमस्य मूल्यवृद्धिः अभवत्।तथैव यमनदेशे दीर्घकालीनयुद्धेन बालकाः कुपोषणेन ग्रस्ताः अभवन्।आधुनिककाले जलवायुपरिवर्तनम् अपि बुभुक्षायाः प्रमुखकारणम् अस्ति।अनियमितवर्षा,अनावृष्टिः, अतिवृष्टिः, उष्णतावृद्धिः, हिमनदीनां गलनम्एतानि सर्वाणि कारणानि कृषिक्षेत्रं प्रभावितवन्तः। यदा कृषिः सफलं न भवति तदा अन्नोत्पादनं न्यूनं भवति। फलतः अन्नस्य मूल्यवृद्धिः भवति तथा निर्धनाः जनाः अधिकाः पीडिताः भवन्ति।निर्धनता बुभुक्षायाः मूलकारणम् अस्ति।यद्यपि अन्नम् आपणेषु उपलब्धं भवति, तथापि निर्धनाः जनाः तद् क्रेतुं न शक्नुवन्ति। जीविकोपार्जनसमस्या, न्यूनवेतनम्, आर्थिकअसमानता च एतां समस्यां वर्धयन्ति।बहुषु देशेषु श्रमिकाः न्यूनवेतनेन कार्यं कुर्वन्ति। तेषां परिवाराः पौष्टिकभोजनं प्राप्तुं न शक्नुवन्ति। बुभुक्षया केवलं उदरपीडा न भवति। तस्य बहवः दुष्परिणामाः अपि सन्ति यथा-शारीरिकदुर्बलता,रोगप्रतिरोधकशक्तेः न्यूनता, बालविकासस्यअवरोधः, मानसिकविकासस्य बाधा, रोगप्रवणता,मृत्युदरवृद्धिः, विशेषतः बालकाः कुपोषणेन अधिकं प्रभाविताः भवन्ति। तेषां शिक्षणशक्तिः अपि न्यूना भवति।विश्वे बुभुक्षासंकटे महिलाः तथा बालकाः सर्वाधिकं पीडिताः सन्ति। गर्भवत्यः महिलाः यदि पौष्टिकभोजनं न प्राप्नुवन्ति तर्हि तेषां शिशवः अपि दुर्बलाः जायन्ते। बाल्यावस्थायां पोषणाभावः सम्पूर्णजीवनं प्रभावितुं शक्नोति। विश्वे प्रतिवर्षं विशालमात्रायां अन्नस्य अपव्ययः भवति। विवाहेषु,उत्सवेषु,भोजनालयेषु गृहेषु,बह्वन्नं नष्टं भवति। यदा कोटिशः जनाः बुभुक्षया पीडिताः सन्ति तदा अन्नस्य अपव्ययः महती नैतिकसमस्या अस्ति। यदि अन्नस्य समुचितवितरणं क्रियेत तर्हि बुभुक्षासमस्या न्यूनीकर्तुं शक्येत।कृषकाः अन्नदातारः सन्ति। तथापि अनेकेषु देशेषु कृषकाः आर्थिकसंकटे जीवनं यापयन्ति।ऋणभारः,सिंचनाभावः,बीजसमस्या,मूल्यन्यूनता प्राकृतिकआपदः एताभिः समस्याभिः कृषकाः प्रभाविताः भवन्ति। यदि कृषकः सशक्तः न भवेत् तर्हि अन्नसुरक्षा अपि न सम्भवेत्। संयुक्तराष्ट्रसङ्घस्य विश्वखाद्यकार्यक्रम,खाद्य एवं कृषिसंस्थानम् तथा यूनिसेफ इत्यादयः संस्थाः विश्वबुभुक्षायाः उन्मूलनाय प्रयत्नं कुर्वन्ति। ते—अन्नसहायतां वितरन्ति।पोषणकार्यक्रमान् चालयन्ति।कृषकानां प्रशिक्षणं कुर्वन्ति। बालपोषणयोजनाः सञ्चालयन्ति।
"शून्यं बुभुक्षित" इति लक्ष्यं वैश्विकस्तरे स्वीकृतम् अस्ति।
भारते बुभुक्षायाः स्थितिः भारतदेशः कृषिप्रधानदेशः अस्ति। तथापि अत्र कुपोषणस्य समस्या अद्यापि दृश्यते। विशेषतः—ग्रामीणक्षेत्रेषु ,आदिवासीप्रदेशेषु लघुगृहवासेषु,जनाः पौष्टिकभोजनस्य अभावं अनुभवन्ति।भारतसर्वकारेण बहवः कार्यक्रमाः सञ्चालिताः मध्याह्नभोजनयोजना, सार्वजनिक-वितरणप्रणाली,पोषणाभियानम्,अन्नपूर्णायोजना प्रधानमंत्री निर्धनकल्याण-अन्नयोजना एताभिः योजनाभिः निर्धनजनानाम् अन्नसुरक्षां सुनिश्चितुं प्रयत्नः क्रियते।आधुनिकप्रौद्योगिकी कृषिक्षेत्रे महत्त्वपूर्णं योगदानं ददाति। उन्नतबीजानि, आधुनिकसिंचनम्, ड्रोनप्रयोगः, जैविककृषिः, मौसमपूर्वानुमानम् एतेषां माध्यमेन उत्पादनं वर्धते। यदि वैज्ञानिकपद्धत्या कृषिः क्रियते तर्हि विश्वस्य अन्नसमस्या न्यूनीकर्तुं शक्यते।
**नैतिकदृष्ट्या समस्या**-बुभुक्षा मानवतायाः अपमानः अस्ति। यदा एकस्मिन् देशे अन्नस्य अत्यधिकभोगः दृश्यते, अपरत्र बालकाः बुभुक्षया म्रियन्ते तदा असमानता स्पष्टं दृश्यते।अतः धनीदेशानाम् अपि दायित्वं वर्तते यत् ते निर्धनदेशानां साहाय्यं कुर्वन्तु।
**समाधानस्य उपायाः**- विश्वबुभुक्षासमस्यायाः समाधानाय निम्नलिखिताः उपायाः आवश्यकाः—कृषिविकासः, जलसंरक्षणम्,अन्नस्य न्यायपूर्णवितरणम्, निर्धनतायाः उन्मूलनम्, नारीशिक्षा, पोषणजागरूकता, अन्नस्य अपव्ययनिरोधः, वैश्विकसहयोगः, सततविकासनीतिः, वैज्ञानिककृषेः प्रोत्साहनम् इति। युवानः समाजपरिवर्तनस्य प्रमुखशक्तिः सन्ति। ते अन्नदानकार्यक्रमेषु भागं गृह्णीयुः।अन्नस्य अपव्ययं न कुर्युः।निर्धनपरिवारान् साहाय्यं कुर्युः।जागरूकतां प्रसारयेयुः। विश्वे बुभुक्षायाः स्थितिः अद्यापि अत्यन्तं चिन्ताजनका अस्ति। विज्ञानस्य, अर्थव्यवस्थायाः, वैश्वीकरणस्य च प्रगतौ अपि यदि कोटिशः जनाः बुभुक्षया पीडिताः सन्ति तर्हि मानवसभ्यता पूर्णा नास्ति। बुभुक्षायाः समाधानं केवलं सर्वकारस्य उत्तरदायित्वं न, अपितु सम्पूर्णमानवसमाजस्य दायित्वम् अस्ति। प्रत्येकं मानवः अन्नस्य सम्मानं कुर्यात्, अपव्ययं त्यजेत्, निर्धनानां सहाय्यं कुर्यात्।यदा विश्वस्य सर्वाणि राष्ट्राणि मिलित्वा कार्यं करिष्यन्ति तदा एव "शून्यबुभुक्षा" इति लक्ष्यं साधयितुं शक्यते।अतः वयं सर्वे संकल्पं कुर्मः—

**"सर्वे भवन्तु तृप्ताः, न कश्चिद् बुभुक्षितः भवेत्।"इत्यलम्।।**



**पल्लवी द्विवेदी,**
लेखिका संस्कृत छात्रा - इलाहाबाद विश्वविद्यालय संस्कृत विभाग!
प्रयागराज उत्तर प्रदेश!

## विद्यार्थीजीवने अनुशासनसन्देशः

१. अनुशासनं जीवनस्य शोभां वर्धयति।
२. छात्राः नियमपालनेन यशः प्राप्नुवन्ति।
३. समयस्य मूल्यं ज्ञात्वा कार्यं कर्तव्यं सदा।
४. आलस्यं त्यक्त्वा अध्ययनं मनसा कुरुत।
५. गुरूणां वचनं श्रद्धया श्रोतव्यं नित्यम्।
६. गुरुवचनं तेषां जीवनस्य प्रकाशः भवति।
७. विनयः छात्रस्य भूषणं श्रेष्ठतमं भवति।
८. परिश्रमः एव उज्ज्वलभविष्यस्य द्वारं उद्घाटयति।
९. परिश्रमेण एव सफलता समीपं आगच्छति।
१०. अनुशासितजीवनं सफलता-सुखयोः मूलं भवति।
११. शिस्तं विना न जीवनं शोभते कदाचन।
१२. नियमपालनं छात्राणां प्रथमं कर्तव्यं भवति।
१३. समयपालनं सफलतायाः मूलकारणम् अस्ति।
१४. गुरूणां सम्मानः विद्यायाः अलंकारः भवति।
१५. अध्ययनं नित्यं कर्तव्यं आलस्यं त्याज्यम्।
१६. मधुरवाणी मित्राणां हृदयं जयति।
१७. अनुशासिताः छात्राः राष्ट्रस्य भविष्यं भवन्ति।
१८. शिस्तयुक्तजीवनं सर्वदा सुखदं भवति।
१९. छात्रजीवनं संघर्षस्य अपि आनन्दस्य च संगमः अस्ति।

"ये छात्राः शिस्तयुक्ताः, ते एव यान्ति उन्नतिम्।
तेषां जीवनपुष्पाणि, सुगन्धीनि भवन्ति सततम्।।"

